दिनाङ्क :- 15.07.2025

प्रात: - 06:55

## आक्सियम्-4

भारतीय-अन्तरिक्षयात्री- ग्रुपकैप्टनाख्यः शुभांशु-शुक्लः आक्सियम्-4 इत्यभियानस्य च अन्ये त्रयः कर्मचारिणः ह्यः अपराह्णे अन्ताराष्ट्रिय-अन्तरिक्षस्थानात् स्वकीयमन्तरिक्षयानम् अन्डाक्किङ्ग् इति कृत्वा भूमिं प्रति प्रत्यागमनयात्राम् आरब्धवन्तः। अद्य भारतीयसमयानुगुणं सायं त्रिवादने क्यालिफोर्निया-तटं निकषा भूमिं प्रत्यागमिष्यन्ति च। स्पेस्-एक्स इत्यनेन सामाजिक-प्रसार-माध्यमे दृढीकृतं यत् तस्य ड्रैगन् इति क्रू-कैप्सूल् इति। ग्रूप्-कैप्टन् शुक्लं, चालकदलेन सह वहत्, आई. एस. एस. इत्यतः सफलतया निष्कासयिष्यतीति। पञ्चोत्तरसार्धैकशताधिकेति याने स्वस्य यात्रान्तस्योपदेशे भारतस्य प्रथमान्तरिक्षयात्रिकस्य राकेशशर्मणः ऐतिहासिकवाक्यानां पुनरावर्तनं कुर्वन्, ग्रूप्-क्याप्टन् शुक्लः अवदत् यत् भारतं अद्यापि ऊर्ध्वतः "सारे जहाँ से अच्छा" एव दृश्यते इति।

अवरोहणानन्तरं, ग्रूप्-कैप्टन् शुभांशु शुक्लः, अन्यैः चालकदलस्य सदस्यैः सह, भूमेः गुरुत्वाकर्षणेन पुनः अनुकूलतां प्राप्तुं फ्लैट्-सर्जन्स् इत्यस्य पर्यवेक्षणे सप्तदिनानां पुनर्वसन-कार्यक्रमे भागं ग्रहीष्यति।

## जयशङ्कर-चीन यात्रा

चीनयात्रायां गत: विदेश-कार्यमन्त्री डॉ. एस. जयशङ्करः, सीमापार-नद्योः विषये सहकारस्य आवश्यकतां अधोरेखितवान्। मन्त्री बिजिङ्ग्-नगरे चीनदेशस्य समकक्षीयेन वांग् यी इत्यनेन सह द्विपाक्षिकं मेलनं कृतवान्। सः प्रतिबन्धक-व्यापारोपायान् अपि स्वीकृत्य, आर्थिकसहयोगस्य मार्ग-अवरोधान् च स्वीकृतवान्।

## राष्ट्रपतिः ओडिशाः

राष्ट्रपतिः द्रौपदी मुर्मुः अद्य ओडिशा-राज्यस्य कटक्-नगरे रेवेन्शा-विश्वविद्यालयस्य त्रयोदशे वार्षिक-दीक्षान्त-कार्यक्रमे भागं सङ्गृह्य रेवेन्शा-बालिका-उच्चविद्यालयस्य त्रयाणां भवनानां पुनर्विकासस्य शिलान्यासं करिष्यति। आदिकवि-सरला-दास इत्यस्याः जन्मवार्षिक-उत्सवे अपि भागम् गृहीत्वा, कटक्-नगरे च गतवर्षस्य कलिङ्ग-रत्नपुरस्कारं प्रदास्यति।

## ओडिशा-बालासोर-छात्रा

ओडिशा-राज्ये बालासोर-नगरस्य फ़कीर्-मोहन-स्वायत्त-महाविद्यालयस्य छात्रा, या एकस्मिन् संकायसदस्योपरि यौन-उत्पीडनस्य आरोपं कृत्वा आत्मदाहस्य प्रयासं कृतवती, भुवनेश्वरस्य एम्स इति चिकित्सालये चिकित्सारता, मृता। बालिका पञ्चोनशतप्रतिशतं दग्धा आसीत्। राष्ट्रपतिः द्रौपदी मुर्मू ह्यः सायङ्काले एम्स्-भुवनेश्वरे बालिकायाः मातापितृभिः सह मिलित्वा घटनायाः विषये गभीरं चिन्तां प्रकटितवती। तस्याः चिकित्सां कुर्वतां वैद्यैः सहापि सा तस्याः अवस्थायाः विषये पृष्टवती। आरक्षकैः पूर्वमेव महाविद्यालयस्य सहायकप्राध्यापकः मुख्यः अभियुक्तश्च निगडनपूर्वकं घटनायाः सन्दर्भे महाविद्यालयस्य प्राचार्यश्चापि गृहीतोऽस्ति। ओडिशा-राज्यस्य मुख्यमन्त्री मोहन चरण् माझी, केन्द्रीय-शिक्षा-मन्त्री धर्मेन्द्र प्रधानश्च तस्याः अवसाने गभीरं शोकं प्रकटितवन्तौ।

## विदेशमन्त्रालयः रथयात्रा

टोरण्टो-नगरे रथयात्रेति शोभायात्रायाः समये उत्पन्नस्य व्यवधानस्य भारतं दृढतया निन्दाम् अकरोत्, एतत् कृत्यं निन्दनीयं इति च अमन्यत्। केनडा-देशस्य अधिकारिभ्यः उत्तरदायीनां विरुद्धम् कार्यम् कर्तुम् आग्रहमपि अकरोत्। घटनायाः विषये वार्ताहराणां प्रश्नानाम् प्रत्युत्तरे, विदेशमन्त्रालयस्य प्रवक्ता रणधीर् जैसवालः अवदत् यत्, भारतेन केनडादेशस्य अधिकारिभिस्सह दृढतया प्रकरणमिदं प्रस्थापितमस्तीति, येन अपराधिनः उत्तरदायिनश्च दण्डिताः भवेयुरिति।

-

-

**धावकः फौजा सिङ्हः मृतः**

चतुर्दशोत्तरशत वर्षीयः सुप्रसिद्धः म्यारथान् इति धावकः सरदार फौजा सिङ्हः ह्यः जलन्धर्-जनपदे मार्गदुर्घटनायां मृतः।

**ऋतुविज्ञानविभागः**

अद्य देशस्य वायव्यदिशि, पूर्वदिशि, मध्यभागे च अधिकतोधिक वर्षायाः पूर्वानुमानं ऋतुविज्ञानविभागेन कृतमस्ति।

**निकषस्पर्धा**

क्रिकेट्-क्रीडायां गतरात्रौ लण्डन्-नगरस्य लार्ड्स्-क्रीडाङ्गणे अन्तिमदिने इङ्ग्लेण्ड्-देशं विरुध्य एण्डर्सन्-तेण्डुल्कर्-ट्रोफीति क्रीडायाः तृतीयायां निकषस्पर्धायां भारतीयदलं पराजितम्। आतिथेयैः निर्धारितस्य त्रिनवत्युत्तरैकशतधावनाङ्कानां लक्ष्यस्य अनुसरणं कुर्वद् भारतीयदलम् सप्त्युत्तराधिकशतधावनाङ्केष्वेव पराभूतम्। इङ्ग्लेण्ड्-देशः सम्प्रतिः पञ्च-निकष-क्रीडायाः श्रृङ्खलायां द्वि-एक अङ्काभ्याम् अग्रे अस्ति।